॥ श्रीः ॥

श्रीउच्छिष्टमहागणपति-कल्पः

सम्पादकः
डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथन्
'कार्यकारः'

रु० ८.००

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

॥ श्रीः ॥

श्री उच्छिष्टमहागणपति-कल्पः

सम्पादकः

डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथन्

'कार्यकारः'

केन्द्रीयशिक्षासंस्कृतिमन्त्रालये उपपरामर्शदाता (संस्कृते)

एम० ए०, पीएच० डी०, साहित्याचार्यः

नई दिल्ली-११०००१

१९८३

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

श्री उच्छिष्टमहागणपतिकल्पः

सम्पादकः : डा० शास्त्रपुरम् रामकृष्ण (सी०आर०) स्वामिनाथन्

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

मुद्रकः : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

संस्करणम् : द्वितीयम्, १९८३

मूल्यम् : अष्टौ रूप्यकाणि रु० ८ ००

देववाणी-परिषद्, दिल्ली
विक्रम २०४० स्थापनाब्दः १९८३

SRI UCHCHHISHTAMAHAGANAPATHIKALPA

Edited by : Swaminathan, Dr. C.R.

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Deva Vani Printers
Uttam Nagar, New Delhi-110059

Edition : Second, 1983

Price : Rupees Eight only Rs. 8-00

प्रास्ताविकम्

अभीप्सितार्थसिद्ध्यर्थं सुरासुरैः पूजितस्य सवविघ्नहरस्य गणाधिपतेरुपासनाक्रमेषु 'उच्छिष्टगणपति'रूपेण तस्य समर्चा किमपि विशिष्टं वैशिष्ट्यं दधाति । उच्छिष्टगणपतिपूजाविषये नाधिकानि पुस्तकानि लभ्यन्ते । डा० शास्त्रपुरम् रामकृष्णस्वामिनाथमहाभागेन महता परिश्रमेण तत्र श्रद्धालूनामुपकाराय श्रीश्रीरामनन्देन्द्रसरस्वतीस्वामिसाक्षात्कृतस्य 'श्री उच्छिष्टमहागणपतिकल्प'स्य सम्पादनं विहितम् यस्मिन् ध्यानश्लोकानां, मूलमन्त्राणां, कवचस्य, किङ्कराणां, पीठशक्तीनां, यन्त्रोद्धारस्य, तर्पणविधेः, होमविधेः, नीलसरस्वत्याः, अष्टोत्तरशतनामावल्याः, उच्छिष्टगणपतिस्तवस्य, सुप्रभातस्य, मङ्गलस्तोत्रस्य मन्त्रमालास्तुतेश्च समावेशः कृतः । अस्य ग्रन्थस्य प्रथमं संस्करणं १९७८ तमेशवीये ऽब्दे प्रकाशितमभूत् । देववाणी-परिषदा च संशोधितं द्वितीयं संस्करणं प्रकाश्यते । श्रद्धालूनामुपकारायेदं भूयादिति कामयते ।

४-११-१९८३, दीपावली, वि० सं० २०४०
आर ६, वाणी-विहारः,
नयी दिल्ली-११००५९

(डा० रमाकान्त शुक्लः)
महासचिवः
देववाणी परिषद्, दिल्ली

पुरोवाक्

श्री श्री रामानन्देन्द्रसरस्वतीस्वामिचरणैः संकलितस्य उच्छिष्टमहागणपतिपूजाजपहोमविधानस्य पुनर्मुद्रणं प्रकाशनं च निर्वोढुं योऽवसरो ऽनेन जनेन प्राप्तस्तदर्थं श्रीचरणेभ्यः कृतज्ञतासूचकं प्रणामाञ्जलिं निवेदयामि। पूर्वप्रकाशने दृष्टानां मुद्रणत्रुटीनां संशोधनमपि यथामति निर्वर्तितमत्र। श्रीगणेशानुग्रहपात्रभूतानां स्वामिचरणानामन्यान्यपि पुस्तकानि प्रायशः नोपलभ्यानि वर्तन्ते। तेषामपि पुनर्मुद्रणं क्रमशः कर्तुमस्ति मनीषा। तत्र विघ्नेश्वरस्य कृपया साफल्यं प्राप्यत इति विश्वासः।

सर्वेषां तन्त्रशास्त्राणां प्रारम्भः मूलाधारचक्रादेव। देवतास्वग्रगण्यो गणेशः व-श-ष-स इति दलचतुष्टययुते मूलाधारे सन्निधत्तइति तन्त्रविदां विदितचरमेव। बहुप्रकारेणोपास्यो गजास्यः प्रणवाकारतया देवतान्तरोपासकानामपि ध्येयः सिद्धिप्रदश्च। तेषु उच्छिष्टगणपतिरेकः प्रकारः। वल्लभा नीलसरस्वतीति आख्याद्वयेन विदिता तस्य शक्तिः। निखिलस्य प्रपञ्चस्य प्रादुर्भावः प्रकृतिरूपिण्याः शक्त्याः योनिदेशादेव सम्भवति। स्पर्शमात्रेण तां योनिं निखिलस्य प्रपञ्चस्य सर्जनाय प्रवर्तयति श्रीगणेशः। इत्थं सृष्टिप्रक्रियां संकेतयति उच्छिष्टगणपतेः स्वरूपम्। वहोः कालात् वाममार्गं क्रमेणैव उच्छिष्टगणपतेरुपासना प्रचलति स्म। परन्तु दक्षिणमार्गेणाऽपि तस्योपासना कर्तुं शक्यते, सात्त्विकी पूजाऽपि नितरां फलप्रदा इति जगति प्रथमं श्रीचरणैरेव निरूपितम्। मन्त्रसिद्ध्या श्रीगणेशं साक्षात्कृतवद्भिस्तैः आराध्यदेवताप्रसादादेव अस्य पूजाकल्पस्य साक्षात्करणं कृतम्। अतः कल्पसूत्रकाराणां साक्षात्कृतधर्माणामृषीणां गोष्ठ्यां श्रीरामानन्देन्द्रसरस्वती श्रीचरणा अपि परिगणनीया। अशीत्यधिकवयस्कानां तेषां मार्गदर्शनेन बहवो भक्ताः स्वाभीष्टं प्राप्तवन्त इत्यत्र नास्त्याश्चर्यम्। एतादृशासिद्धपुरुषाः करालेऽप्यस्मिन् कलौ प्रादुर्भवन्तीति भारतदेशस्यानितरसाधारणं गौरवम्।

अनेन पूजाहवनकल्पेनोपकृताः भक्तजनाः भगवतो वल्लभावल्लभस्य गलद्दानगण्डस्य क्षिप्रप्रसादिनो गणेशस्य कृपाकटाक्षतरङ्गप्लाविताः भूयासुरिति प्रार्थयते।

दीपावली, वि०सं० २०४०

भारद्वाजः शास्त्रपुरं स्वामिनाथ शर्मा

PREFACE

'Sakthi Ganapathi' is also known as 'Uchchhishta Ganapati', The background of this form of Ganapathi is not quite clear. But, it is not popular among the sixteen forms of Ganapathi which are worshipped in our religion. The followers of Buddhism seem to have worshipped Ganapathi in this form. The Hindus who came to know of the many advantages resulting from the upasana of this deity are said to have been worshipping Him secretly. Though the Pallavas in South India had installed Him at many places in the south, still this form of Lord Ganapati had not come to the open. Even the pujaris in the temples where this form of Ganapathi exists do not seem to be fully aware of special attributes of this God. The Murti is specially significant for His form in combination with Shakti.

The mantra of this deity is highly powerful. Curing chronic diseases, warding off difficulties posed by others. creating friendly feelings, fulfilling one's ambitions are some of the important effects of this mantra and results will be felt almost immediately. It is well known that in this 'Kali Yuga', Lord Ganapathi and Goddess Durga are the only twin deities who can fulfil one's cherished desires. In the form of Uchchhishta Ganapathi a combination of these two primary powers Shiva and Shkti is manifest. Inspite of the fact that this form of Lord Ganapathi can bestow on the aspirant such immense good, the deity is not quite popular in Tamilnadu and only a few people are knowledgeable in the worship of this murti. The mantra is recited secretely. Neither this murti is popular outside Tamilnadu

nor the forms of worship is known outside. A few devotees in North India have learnt this mantra from Tamilnadu and live happily.

It has fallen to Mahakvi SRI SUNDARESA SARMA of Thanjavur. Now known as his Ramanandrendra Saraswati after his initiation to Sanyasa to popularise this murti as well as the Japa Vidhis. Several of his disciples are now worshipping Uchchhishta Ganapati in various parts of the country and abroad. He has, on his own, built a temple at a cost of about Rs. 2 lakhs for this murti at Srinivasapuram in Thanjavur. He has also written a book explaning the various mystic aspects of the worship of this deity. THE TEMPLE IS THE ONLY ONE OF ITS KIND IN WHOLE OF INDIA. He has written and published many books tn Tamil and Sanskrit and has been honoured for his works with such titles Maha Kavi and Kavi Chakravarti.

This publication is a compilation of all the stotras and puja vidhis required for the worship of Uchchishta Ganapathi and attaining mantra sidhi. Properly initiated by a competent guru, the savant is bound to achieve all that is good and attainable both in this and the other world. It is hoped that devotees would profit by this handy publication.

Santasramam, 30-D, Giri Road,)
Srinivasapuram, Thanjavoor,) R. Rambhavuswamy.
6, Sep. 1978.)

ॐ

श्री उच्छिष्टमहागणपतिकल्पस्य विषयानुक्रमणिका

१ श्री उच्छिष्टगणपतिः
२ ध्यानश्लोकाः
३ मूलमन्त्राः
४ कवचम्
५ किङ्कराः
६ पीठशक्तयः
७ यन्त्रोद्धारः
८ तर्पणविधिः
९ होमविधिः
१० नीलसरस्वती
११ अष्टोत्तरशतनामावलिः
१२ उच्छिष्टगणपतिस्तवः
१३ श्रीसुन्दरविनायकसुप्रभातम्
१४ मङ्गलम्
१५ मन्त्रमालास्तुतिः

श्री उच्छिष्टमहागणपतिः

❀

उशैनी रागः पु शा तालः

प. उच्छिष्टगणपतिं ऊरूकलितवामं
ऊर्ध्वरेतसमाश्रये ओंकाररूपम् ।

अ. इच्छागृहीतदेहं सच्छास्त्रामात्रवेद्य
कच्छपीधर मुनि कलितवरस्तवं—

च. वालव्यजनकर वनितासमावृतं
चेलाजिनतापस निकरपरिवारं
शीलविबुधावन यागपावकजातं
मूलाधारनिलयं मूषकवरवाहं

×

ध्यानश्लोकाः

१. शरान् धनुः पाशसृणौ स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ।
विवस्त्रपत्न्यां सुरतप्रवृत्तम् उच्छिष्टमम्वासुतमाश्रयेऽहम् ॥

२. हस्तैर्बिभ्रतमिक्षुखण्डवरदौ पाशांकुशौ पुष्करम् ।
स्पृष्टस्वप्रमदावराङ्गमनया स्पृष्टं स्वकं शेफसम् ॥
श्यामाङ्ग्या विधृताब्जया त्रिनयनं चन्द्रार्धचूडं जपा-
रक्तं हस्तिमुखं स्मरामि सततं भोगातिलोलं प्रभुम् ॥

३. वामाङ्कन्यस्तकान्तां कुचतटविलसत् मौक्तिकोद्दामहारां
वामेनालिङ्ग्य दोष्णा चिबुककृतमुखं योनिदेशे च शुण्डाम् ।
कृत्वा मत्तेभलीलं करतलविलसत्पानपात्राङ्कुशादिं
वन्दे स्वर्णाभिधानं गणपतिममलं वल्लभोच्छिष्टदेवम् ॥

४. सान्द्रसिन्दूरलिप्ताङ्गं नग्ननारीमुखातुरम् ।
नारीयोनिमुखास्वादलोलुपं काममोहितम् ॥
स्ववामाङ्कस्थदाराणां गाढालिङ्गनतत्परम् ।
स्वपादपद्मभक्तानामभीष्टफल दायकम् ॥
पललं चषकं पाशमङ्कुशं च दधानकम् ।
उच्छिष्टगणपं ध्यायेत् भक्ताभीष्टप्रदायकम् ॥

५. देवं बालसहस्रभानुसदृशं मत्तेभवक्त्रांबुजं
हस्ताभ्यां चषकं पवित्रपललं धृत्वा प्रमोदान्वितम् ।

मत्ताया स्मरगहलग्नवदनं वामाङ्कगाया मुदा
उच्छिष्टाख्य गणेशमूर्तिमरुणं नित्यं भजेऽहं प्रभुम् ॥

६. चतुर्भुज रक्ततनुं त्रिनेत्रं
पाशाङ्कुशौ मोदकपात्रदन्तौ ॥
करैर्दधानं सरसीरुहस्थ
उन्मत्तमुच्छिष्टगणेशमीडे ॥

मूलमन्त्राः

१. **नवाक्षरी**— हस्तिपिशाचिलिखे स्वाहा ।

२. **दशाक्षरी**— ह्रीं गं ह्रीं वशमानय स्वाहा ।

३. **द्वादशाक्षरी**— ॐ ह्रीं गं हस्ति पिशाचिलिखे स्वाहा ।

४. **द्वात्रिंशाक्षरी**— ॐ हस्तिमुखाय लम्बोदराय उच्छिष्ट-महात्मने आं क्रों ह्रीं क्लीं ह्रीं हूं घे घे उच्छिष्टाय स्वाहा ।

५. **त्रयस्त्रिंशाक्षरी**— ॐ क्लीं महारजत वल्लभोच्छिष्टगण-पतये सर्वराज्ञां धनमानय क्लीं धनं देहि स्वाहा ।

६. **सप्तत्रिंशाक्षरी**— ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने आँ क्रों ह्रीं गं घे घे स्वाहा ।

७. **मालामन्त्रः**— ॐ क्लीं महारजतवल्लभ स्वर्णाकर लम्बोदर लम्बकर्ण देवीयोनिरेतःपङ्का-वलिप्त शुण्डाल गजानन मदिरावासना-रक्तहृदय विकटाट्टहास उच्छिष्टदेव मम वाममार्गानुसारिणः धन देहि धनं देहि क्रों क्रौं क्रौञ्चभेदनानुज सर्वराज्ञो मम वशं कुरु वशं कुरु मम शत्रूणां जिह्वां कीलय कीलय सकलजनान् वशमानय वशमानय क्लैं क्लों क्लूं क्लैं क्लौं क्लः स्वाहा ।

कवचम्

हुङ्कारं मे शिरः पातु औंङ्कारं हृदयेऽवतु ।
वाग्भवं च शिखां पातु पातु फालं गणेश्वरः ॥
नेत्रयोश्च त्रिनेत्रस्तु नासिकां मे महेश्वरः ।
ओष्ठौ पातु महाशूरः चिबुकं मूषवाहनः ॥
कपोलौ पातु वीरेशः कण्ठं पातु विजृम्भणः ।
बाहू पातु पराभीतिधारणस्साङ्गुली तथा ॥
उन्मत्तः पातु कुक्षिं च कटिं पातु वशीकरः ।
नितम्बं पातु दैत्यारिः ऊरू पातु विनायकः ॥
जानुनी पातु नग्नश्च गुल्फदेशे हलायुधः ।
दंष्ट्रान् करालवदनः रोमान् पातूर्ध्वगोचरः ॥
रोमकूपांस्तु कौबेरः त्वचं गौरीसुतः प्रभुः ।
रक्तमज्जावसामांसान् अस्थिमेधांश्च पावकः ॥
अन्त्रांश्च कालरात्रिस्तु मकुटं मकुटेश्वरः ।
ज्वालामुखस्तथा ज्वालां अभेद्यस्सर्वसन्धिषु ॥
आयुर्मेऽवतु वागीशः विद्यां च विजयस्तथा ।
आयुः कीर्तिं च लक्ष्मीं च सदावतु गणाधिपः ॥
पुत्रान् रक्षेत् महादेवो भार्यां रक्षतु भैरवः ।
मार्गं क्षेमकरः पातु विजयः सर्वतः स्थितम् ॥

रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्षतां देवः उच्छिष्टगणनायकः ।।
प्रजपन् कवचं नित्यं यत्र कुत्रापि गच्छति ।
तत्र तत्र अर्थलाभश्च विजयश्च पदे पदे ।।

किङ्कराः—

मद्यप्रियश्च मांसाशी मन्मथो विषयप्रियः
स्तंभको मोहको विद्वान् मेधावी पंडितः कविः
सभामोहकरो विद्याजयदो वाग्विलासदः
वाग्मी वाचालनिपुणः गणेशस्य तु किङ्कराः
नामानुरूपशक्त्याढ्याः स्व स्व शक्तिसमन्विताः ।।

पीठशक्तयः—

तीव्रा च ज्वालिनी नन्दा भोगदा कामदायिनी
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ।
पत्राष्टके कर्णिकायां सन्त्येताः पीठशक्तयः
नवैता पद्मसहिताः कथिता दश नामभिः ।।

श्रीः

।। यन्त्रोद्धारः ।।

षट्कोणमष्टपत्रं च
वृत्तषोडशपत्रकम् ।
अष्टास्रं चतुरस्रं तु
चतुर्द्वारं सुशोभितम् ।।

षट्कोणमध्ये गं वीजं गामित्यादि षडस्रके ।
षट्कोणादिषु आं क्रों ह्रीं
श्रीं क्लीं ग्लौं च लिखेत् सुधीः ।
अष्टपत्रं प्रतिदले घे-घे ति विलिखेत् ततः ।।

षोडशेषु स्वरान् लिख्य
ब्राह्म्यादींश्चाष्ट पत्रके ।
इन्द्रादींश्चतुरस्रे तु
द्वारेषु ग्लौं लिखेत् ततः ।।

द्वात्रिंशदक्षरमंत्रतर्पणविधिः

संकल्पः

करन्यासः

ॐ हस्तिमुखाय	अङ्गुष्ठाभ्यां नमः
लम्बोदराय	तर्जनीभ्यां स्वाहा
उच्छिष्टमहात्मने	मध्यमाभ्यां वषट्
आं क्रों ह्रीं	अनामिकाभ्यां हुं
क्लीं ह्रीं हूं	कनिष्ठिकाभ्यां वौषट्
घे घे उच्छिष्टाय स्वाहा	करतलकरपृष्ठाभ्यां फट्

अङ्गन्यासः

ॐ हस्तिमुखाय	हृदयाय नमः
लम्बोदराय	शिरसे स्वाहा
उच्छिष्टमहात्मने	शिखायै वषट्
आं क्रों ह्रीं	कवचाय हुं
क्लीं ह्रीं हूं	नेत्रत्रयाय वौषट्
घे घे उच्छिष्टाय स्वाहा	अस्त्राय फट्

ॐ भूर्भुवस्सुवरों इति दिग्बन्धनम्

मूलमन्त्रः :

ॐ हस्तिमुखाय लम्बोदराय
उच्छिष्टमहात्मने आं क्रों ह्रीं क्लीं ह्रीं हुं घे घे
उच्छिष्टाय स्वाहा ॥
हरिद्रायुक्तचंदनोदकेन स्वामिमस्तके
मूलमन्त्रेण अष्ठोत्तरशतं तर्पणं कुर्यात् ।
उच्छिष्टगणपतिं तर्पयामि नमः इति ।

यथा ओं मूलं-उच्छिष्ठगणपतिं तर्पयामि नमः ।

॥ चतुरावर्ति तर्पणम् ॥

मूलमंत्रेषु एकत्रिंशकेषु क्रमशः एकैकं आद्यक्षरं जप्त्वा तदनन्तरं मूलमंत्रमपि उच्चार्य चतुर्वारं उच्छिष्टमहागणपतिं तर्पयामि नमः इति तर्पयेत् । ३१×४=१२४

यथा ओं "हं" हस्तिमुखाय लंबोदराय उच्छिष्ट महात्मने आं क्रों ह्रीं क्लीं ह्रीं हूं घे घे उच्छिष्टाय स्वाहा इत्युक्त्वा तदनन्तरं चतुर्वारं उच्छिष्टमहागणपतिं तर्पयामि नमः इति कुर्यात् ।

"स्ति ; मुं ; खां ; यं ; लं ; बें ; दं ; रां; यं ; उं ; च्छि; ष्टं ; मं; हां ; त्मं ; नें ; आं ; क्रों ; ह्रीं ; क्लीं; ह्रीं; हूं ; घें; घें ; उं; च्छि; ष्टां ; यं ; स्वां ; हां ; इत्थं आद्यक्षराणि योज्यानि" पुनः मूलमंत्रेण चतुर्वारं स्वामिमस्तके तर्पणं कुर्यात् ।

पीठतर्पणम्

आधारशक्ति	तर्पयामि
आदिकूर्म	,,
मूलप्रकृति	,,
अनन्तं	,,
पृथिवीं	,,
धर्मकन्दं	,,
ज्ञाननालं	,,
वैराग्यपत्रं	,,
ऐश्वर्यमणिकां	,,
रत्नसिंहासनं	,,
अधर्मं	,,
अज्ञानं	,,
अवैराग्यं	,,
अनैश्वर्यं	,,
कन्दं	,,
नालं	,,
केसरं	,,
अंकुरं	,,
कर्णिकां	,,
पद्मं	,,

द्वारदेवताः

दुं दुर्गां	तर्पयामि
गं गणपतिं	,,
सं सरस्वतीं	,,
क्षं क्षेत्रपालं	,,

आयुधानि

ॐ पाशं	तर्पयामि
ॐ अंकुशं	,,
ॐ चापं	,,
ॐ बाणं	,,

॥ एतावत् पर्यन्तं स्वामि मस्तके ॥

दिक्पालतर्पणम्

अतः परं स्वामिसन्निधौ

ॐ लं इन्द्राणीसहितम् इन्द्रं	दर्पयामि
ॐ रं स्वाहा–स्वधासहितम् अग्निं	,,
ॐ हं मारि–महामारि सहितं यमं	,,
ॐ शं शक्तिसहितं निर्ऋतिं	,,

ॐ वं वारुणीसहितं वरुणं तर्पयामि
ॐ यं प्रवलाशान्तिसहितं वायुं ,,
ॐ पं श्रीशक्तिसहितं कुबेरं ,,
ॐ शं गौरीशक्तिसहितम् ईशानं ,,
मस्तके मूलमन्त्रेण चतुर्वारं स्वामिसन्निधौ ।।

नवग्रहतर्पणम्

आं आदित्यं तर्पयामि
सुं सोमं ,,
अं अगारक ,,
बुं बुधं ,,
ब्रं बृहस्पतिं ,,
शुं शुक्रं ,,
शं शनैश्चरं ,,
रां राहुं ,,
कें केतुं ,,

सप्तर्षितर्पणम्

ॐ काश्यप ब्रह्माणं तर्पयामि
ॐ अत्रि ,, ,,
ॐ भरद्वाज ,, ,,
ॐ विश्वामित्र ,, ,,
ॐ गौतम ,, ,,
ॐ जमदग्नि ,, ,,
ॐ वसिष्ठ ,, ,,
ॐ नारद ,, ,,

तीर्थेनैव षोडशोपचारपूजा

ध्यानं, आवाहनं, आसनं, पाद्यं, अर्घ्यं, आचमनीयं, मधुपर्कस्नानं, वस्त्रं, उत्तरीयं, यज्ञोपवीतं, गन्धाक्षतपुष्पं, धूपं, दीपं, नैवेद्यं, नीराजनं, नमस्काराः ।

करन्यासः

अङ्गन्यासः .....ॐ भुर्भुवस्सुवरों इति दिक् विमोकः

ब्रह्मार्पणम् : अद्य मया अनुष्ठितं
नीलसरस्वतीसहित श्री उच्छिष्ट महागणपति
तर्पणाख्यं कर्म तत्सत्ब्रह्मार्पणमस्तु ।

॥ शुभं ॥

।। होम-विधिः ।।

सङ्कल्पः—

कुण्डं कृत्वा अग्निं प्रतिष्ठाप्य

कुण्डस्य उत्तरे देशे यथाक्रमं गुरुपूजाकर्तव्या

ॐ श्री गुरुभ्यो नमः

ॐ श्री परमगुरुभ्यो नमः

ॐ श्री परमेष्ठि गुरुभ्यो नमः

दक्षिणे देशे गणपतिनामकं गणं आवाह्य पूजनीयम् ।

अग्निप्रोक्षणं—ॐ भूर्भुवस्सुवः ।

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं । सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् । वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा ।

पर्यग्निकरणं—परितः चन्दनपुष्पादिभिः अलङ्करणं

परिषेचनं—अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व

(पुरतः) (दक्षिण भागे)

सरस्वत्यनुमन्यस्व । देवसवित प्रसुव ।।

(वामभागे) (प्रदक्षिणेन)

इन्द्रादिपूजा—

लाज पुष्पैः प्रत्येकं तत्तद्दिक्षु अर्चनां कुर्यात् ।

इन्द्राय नमः । यमाय नमः । वरुणाय नमः ।

सोमाय नमः । अग्नये नमः । निर्ऋतये नमः ।

वायवे नमः । ईशानाय नमः ।

इति अष्टदिक्पालपूजा ।

पीठ पूजा

गुं गुरुभ्यो नमः

गं गणपतये नमः

आं आधारशक्तये नमः

आदिकूर्माय नमः

मूलप्रकृत्यै नमः

अनन्ताय नमः

पृथिव्यै नमः

धर्मकन्दाय नमः

ज्ञाननालाय नमः

वैराग्यकर्णिकायै नमः

ऐश्वर्यदलेभ्यो नमः

पद्मासनाय नमः

इक्षुसमुद्राय नमः

श्वेत द्वीपाय नमः

रत्नमण्डपाय नमः

कल्पकवृक्षाय नमः

श्वेतछत्राय नमः

सितचामरेभ्यो नमः

रत्नसिंहासनाय नमः

इति अग्नौ स्वामिनः पीठं संस्मृत्य पीठार्चनं कुर्यात्

आवाहनं—

ततः त्रिः प्रणवमुच्चार्य मूलमन्त्रजपं पञ्चवारं दशवारं वा जप्त्वा

एहि एहि भगवन् अग्नौ एहि एहि

उच्छिष्टगणपते स्वामिन् एहि एहि

इत्युक्त्वा हृदयकमलवर्तिनं भगवन्तं गणेशं साङ्गं सायुधं सवाहनं सपरिवारं श्रीनीलसरस्वतीसहितं उच्छिष्टमहागणपतिं आवाहयामि—इत्युक्त्वा लाजगन्धपुष्पाणि अग्नौ निक्षिपेत् ।।

।। प्रार्थना ।।

आवाहितो भव । अमृतो भव ।

स्थापितो भव । सुमुखो भव ।

सन्निहितो भव । सुप्रसन्नो भव ।

सन्निरुद्धो भव । वरदो भव ।

अवगुण्ठितो भव ।

स्वामिन् उच्छिष्टगणपते सर्वजगन्नाथ यावत् होमावासनकं तावत् त्वं प्रीतिभावेन अस्मिन् अग्नौ सन्निधानं कुरु ।

ध्यायामि आवाहयामि

षोढशोपचारपूजा कर्तव्या

करन्यासः)
अङ्गन्यासः) जपे इव

मात्रुकान्यासः

गौ नमः पराय शक्त्यतीत कलात्मने नमः (हृदये)

गीं नमः पराय प्रतिष्ठकलात्मने नमः (गुह्ये)

गां नमः उच्छिष्टगणपतये नमः (पादयो.)

कला न्यासः

गौं नमः पराय शान्तिकलात्मने नमः (शिरसि)

गैं नमः पराय शान्त्यतीतकलात्मने नमः (भ्रूमध्ये)

गूं नमः पराय प्रतिष्ठाकलात्मने नमः (हृदये)

गीं नमः पराय विद्याकलात्मने नमः (गुह्ये)

गां नमः पराय निवृत्तिकलात्मने नमः (पादयोः)

अनन्तरं होमः

होमद्रव्याणि 'अस्त्राय फट्' इति उच्चार्य संप्रोक्ष्य मूलमन्त्रेण होमं कुर्यात्

विशिष्ट होमद्रव्याणि ॥

इक्षवः सक्तवो रंभाफलानि चिपिटास्तिलाः ।
मोदकाः नारिकेलानि लाजा द्रव्याष्टकं स्मृतम् ॥
स्वर्णाप्त्यै मधुना च गव्यपयसा गोसिद्धये सर्पिषा ।
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सर्वर्धये ।
अन्नैरन्नसमृद्धये च सतिलैः द्रव्याप्तये तण्डुलैः ।
लाजाभिर्यशसे कुसुंभकुसुमैः साश्वारिजैः वाससे ॥

उत्तराङ्गः—पूर्णाहुतिः ॥

॥ मङ्गलद्रव्याणि होम अवशिष्टानि च ॥

"पूर्णाहुतिमुत्तमां जुहोति

सर्वं वै पूर्णाहुतिः सर्वमेवाप्नोति

अथो इयं वै पूर्णाहुतिः अस्यामेव प्रतितिष्ठति"

—इति आहुतिं कुर्यात् ॥

ततः आज्याहुतिः ॥

"अग्नये स्वाहा अग्नय इदं न मम

भूस्वाहा ,, ,, ,,

भुवः स्वाहा वायवे ,, ,,

सुवस्स्वाहा सूर्याय ,, ,,

भूर्भुवस्सुवस्स्वाहा प्रजापतये ,,

गुं गुरुभ्यः स्वाहा गुरुभ्य इदं न मम

हां उच्छिष्टगणपतिपरिवारदेवताभ्यः स्वाहा

ह्रीं ,, ,, ,, ,,

ह्रूं ,, ,, ,, ,

ह्रौं ,, ,, ,, ,,

॥ कुम्भोदराय स्वाहा कुम्भोदराय इदं न मम ॥"

आज्यशेषं सर्वं जुहुयात् ॥

"आं ह्रीं चोरगणपतये सर्वाभीष्टान् प्रयच्छ प्रयच्छ सर्वारिष्टान् निवारय निवारय हुं फट् स्वाहा।"

—इति किंचित् हविश्शेषं जुहुयात् ।।

परिषेचनम्—

अदितेऽनु मँस्थाः। अनुमतेऽनु मँस्थाः। सरस्वत्यनु मँस्थाः। देवसवितः प्रासावीः इति

।। पुनः षोडशोपचार पूजा ।।

बलिः ईशान्यदेशे

फलत्रयं माषचूर्णं दधिक्षीरं घृतं तथा
गुडौदनेन संयुक्तं मिश्रीकृत्य प्रदापयेत्

1. क्षं क्षेत्रपालाय नमः इदं बलिं ददामि
2. ह्रीं श्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः इमं बलिं ददामि
3. उच्छिष्टमहागणपतिपार्षदेभ्यः इमं बलिं ददामि

एवं त्रिवारं दद्यात्

एवं होमक्रमः ।।

उद्वासनं

मूलमन्त्रं दशवारं जप्त्वा

अस्मात् अग्नेः आवाहितं साङ्गं सायुधं सशक्तिकं सपरिवारं श्रीउच्छिष्टमहागणपतिं यथास्थानं प्रतिष्ठापयामि ।

इति अग्नौ पुष्पाक्षतान् समर्पयेत् । व्यापकं शीर्षादारभ्य पादपर्यन्तं अङ्गानां स्पर्शनं ।

परिषेचनम्

अदितेऽनु मँस्थाः (पुरतः) । अनुमतेऽनुमँस्थाः (वामभागे) । सरस्वत्यनुमँस्थाः (दक्षिणभागे) । देव सवित प्रासावीः (परिषेचनं) ।

अग्निपूजा

अग्नये नमः इति गन्धपुष्पैः अग्निं पूजयेत्

करन्यासः । अङ्गन्यासः । अपराधक्षमापणं ब्रह्मार्पणम् ।

अद्य मया अनुष्ठितं श्री उच्छिष्टमहागणपति होमाख्यं कर्म ओं तत् सत् । ब्रह्मार्पणमस्तु ।

।। मन्त्रः ।।

"ह्रीं श्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः
।। हुं फट् स्वाहा" इमं बलिं ददामि ।।
।। कुण्डस्य ईशान्यदिशि बलिः दातव्यः ।।

।। ब्रह्मार्पणम् ।।

।। अद्य मया अनुष्ठितं नीलसरवतीसहित श्री उच्छिष्ट महागणपति हवनाख्यं कर्म तत्सत्ब्रह्मार्पणमस्तु ।। "

पुरश्चर्याक्रम :

पुरश्चर्या नाम मन्त्रसिद्ध्यै कर्तव्यं कर्म । कालः कृष्णाष्टमीतः समारभ्य यावत् कृष्णचतुर्दशीम्

लक्षसंख्यां जपं कृत्वा

तद्दशांशं दशसहस्रं होमः (आज्येन)

तद्दशांशं सहस्रसंख्याकं तर्पणं (चन्दनोदकेन)

तद्दशांशं शतसंख्याकं मार्जनं❀

तद्दशांशं दशसंख्याकं ब्राह्मणभोजनं

नीलसरस्वती

अक्षोभ्य ऋषिः बृहती छन्दः नीलसरस्वती देवता

ध्यानं—विश्वव्यापकवारिमध्यविलसत् श्वेताम्बुजन्मस्थितां
काञ्चीनूपुरहारकङ्कणलसत् केयूरमञ्जीरकाम् ।
आप्तैः नागवरैः विभूषिततनुं आरक्तनेत्रत्रयां
कर्त्रीखड्ग कपाल नीलनलिनैः राजत्कराब्जां भजे ॥

मूलं—ॐ ह्रीं स्त्रीं हूं, हूं स्त्रीं ह्रीं

❀मार्जनं नाम दर्भमुष्ट्या तीर्थं गृहीत्वा मूलमन्त्रेण यन्त्रे वा मूर्तौ वा अर्घं निनीय यजमानः स्वशिरसि अवशिष्टं कारयेत् ।

॥ ॐ ॥

श्री उच्छिष्टगणनाथस्य

अष्टोत्तरशतनामावलिः

१. ओं वन्दारुजनमन्दारपादपाय नमो नम ओं
२. ओं चन्द्रार्धशेखरप्राणतनयाय नमो नम ओं
३. ओं शैलराजसुतोत्सङ्गमण्डनाय नमो नम ओं
४. ओं वल्लीशवलयक्रीडाकुतुकाय नमो नम ओं
५. ओं श्रीनीलवाणीलालित्यरसिकाय नमो नम ओं
६. ओं स्वानन्दभावनानन्दनिलयाय नमो नम ओं
७. ओं चन्द्रमण्डलसंदृश्यस्वरूपाय नमो नम ओं
८. ओं क्षीराब्धिमध्यकल्पद्रुमूलस्थाय नमो नम ओं
९. ओं सुरापगासिताम्भोजसंस्थिताय नमो नम ओं
१०. ओं सदनीकृतमार्तण्डमण्डलाय नमो नम ओं
११. ओं इक्षुसागरमध्यस्थमन्दिराय नमो नम ओं
१२. ओं चिन्तामणिपुराधीशसत्तमाय नमो नम ओं
१३. ओं जगत्सृष्टितिरोधानकारणाय नमो नम ओं
१४. ओं क्रीडार्थसृष्टभुवनत्रितयाय नमो नम ओं
१५. ओं शुण्डोद्धृतजलोद्भूतभुवनाय नमो नम ओं

१६. ओं चेतनाचेतनीभूतशरीराय नमो नम ओं
१७. ओं अणुमात्रशरीरान्तर्लसिताय नमो नम ओं
१८. ओं सर्ववश्यकरानन्तमन्त्रार्णाय नमो नम ओं
१९. ओं कुष्ठाद्यामयसन्दोहशमनाय नमो नम ओं
२०. ओं प्रतिवादिमुखस्तम्भकारकाय नमो नम ओं
२१. ओं पराभिचारदुष्कर्मनाशकाय नमो नम ओं
२२. ओं सकृन्मन्त्रजपध्यानमुक्तिदाय नमो नम ओं
२३. ओं निजभक्तविपद्रक्षादीक्षिताय नमो नम ओं
२४. ओं ध्यानामृतरसास्वाददायकाय नमो नम ओं
२५. ओं गुह्यपूजारताभीष्टफलदाय नमो नम ओं
२६. ओं रूपौदार्यगुणाकृष्टत्रिलोकाय नमो नम ओं
२७. ओं अष्टद्रव्यहविःप्रीतमानसाय नमो नम ओं
२८. ओं अवताराष्टकद्वन्द्वप्रधानाय नमो नम ओं
२९. ओं भारतालेखनोद्भिन्नरदनाय नमो नम ओं
३०. ओं नारदोद्गीतरुचिरचरिताय नमो नम ओं
३१. ओं निखिलाम्नायसंघुष्टवैभवाय नमो नम ओं
३२. ओं बाणरावणचण्डीशपूजिताय नमो नम ओं
३३. ओं इन्द्रादिदेवतावृन्दरक्षकाय नमो नम ओं
३४. ओं सप्तर्षिमानसालाननिश्चेष्टाय नमो नम ओं
३५. ओं आदित्यादिग्रहस्तोमदीपकाय नमो नम ओं

३६. ओं मदनागमसत्तन्त्रपारगाय नमो नम ओं
३७. ओं उज्जीवितेशसन्दग्धमदनाय नमो नम ओं
३८. ओं शमीमहीरुहप्रीतमानसाय नमो नम ओं
३९. ओं जलतर्पणसंप्रीतहृदयाय नमो नम ओं
४०. ओं कन्दुकीकृतकैलासशिखराय नमो नम ओं
४१. ओं अथर्वशीर्षकारण्यमयूराय नमो नम ओं
४२. ओं कल्याणाचलशृङ्गाग्रविहाराय नमो नम ओं
४३. ओं आतून-इन्द्रादिसामसंस्तुताय नमो नम ओं
४४. ओं ब्राह्म्यादिमातृनिवहपरीताय नमो नम ओं
४५. ओं चतुर्थावरणारक्षिदिगीशाय नमो नम ओं
४६. ओं द्वाराविष्टनिधिद्वन्द्वशोभिताय नमो नम ओं
४७. ओं अनन्तपृथिवीकूर्मपीठाङ्गाय नमो नम ओं
४८. ओं तीव्रादियोगिनीवृन्दपीठस्थाय नमो नम ओं
४९. ओं जयादिनवपीठश्रीमण्डिताय नमो नम ओं
५०. ओं पञ्चावरणमध्यस्थसदनाय नमो नम ओं
५१. ओं क्षेत्रपालगणेशादिद्वारपाय नमो नम ओं
५२. ओं महीरतिरमागौरीपार्श्वकाय नमो नम ओं
५३. ओं मद्यप्रियादिविनेयिविधेयाय नमो नम ओं
५४. ओं वाणीदुर्गांशसंभूतकलत्राय नमो नम ओं
५५. ओं वरहस्तिपिशाचीहृन्नन्दनाय नमो नम ओं
५६. ओं योगिनीशाचतुष्षष्ठिसंयुताय नमो नम ओं

५७. ओं नवदुर्गाष्टवसुभिस्सेविताय नमो नम ओं
५८. ओं द्वात्रिंशद्भैरवव्यूहनायकाय नमो नम ओं
५९. ओं ऐरावतादिदिग्दन्तिसंवृताय नमो नम ओं
६०. ओं कण्ठीरवमयूराखुवाहनाय नमो नम ओं
६१. ओं मूषकाङ्क महारक्तकेतनाय नमो नम ओं
१२. ओं कुंभोदरकरन्यस्तपानाब्जाय नमो नम ओं
६३. ओं कान्ताकान्ततराङ्कस्थकराग्राय नमो नम ओं
६४. ओं अन्तस्थभुवनस्फीतजठराय नमो नम ओं
६५. ओं कपूरवीटिकासाररक्तोष्ठाय नमो नम ओं
६६. ओं श्वेतार्कमालासन्दीप्तकन्धराय नमो नम ओं
६७, ओं सोमसूर्यबृहद्भानुलोचनाय नमो नम ओं
६८. ओं सर्वसंपत्प्रदामन्दकटाक्षाय नमो नम ओं
६९. ओं अतिवेलमदारक्तनयनाय नमो नम ओं
७०. ओं शशांकार्धसन्दीप्तमस्तकाय नमो नम ओं
७१. ओं सर्पोपवीतहारादिभूषिताय नमो नम ओं
७२. ओं सिन्दूरितमहाकुंभसुवेषाय नमो नम ओ
७३. ओं आशावसनतादृश्यसौन्दर्याय नमो नम ओं
७४. ओं कान्तालिङ्गनसंजातपुलकाय नमो नम ओं
७५. ओं पाशाङ्कुशधनुर्वाणमण्डिताय नमो नम ओं
७६. ओं दिगन्तव्याप्तदानांबुसौरभाय नमो नम ओं
७७. ओं सायन्तनसहस्रांशुरक्ताङ्गाय नमो नम ओं

७८. ओं संपूणप्रणवाकारसुन्दराय नमो नम ओं
७९. ओं ब्रह्मादिकृतयज्ञाग्निसंभूताय नमो नम ओं
८०. ओं सर्वामरप्रार्थनात्तविग्रहाय नमो नम ओं
८१. ओं जनिमात्रसुरत्रासनाशकाय नमो नम ओं
८२. ओं कलत्रीकृतमातङ्गकन्यकाय नमो नम ओं
८३. ओं विद्यावदसुरप्राणनाशकाय नमो नम ओं
८४. ओं सर्वमन्त्रसमाराध्यस्वरूपाय नमो नम ओं
८५. ओं षट्कोणयन्त्रपीठान्तर्लसिताय नमो नम ओं
८६. ओं चतुर्नवतिमन्त्रात्मविग्रहाय नमो नम ओं
८७. ओं हुं गं क्लां ग्लां मुखानेकवीजार्णाय नमो नम ओं
८८. ओं वीजाक्षरत्रयान्तःस्थशरीराय नमो नम ओं
८९. ओं हृल्लेखागुह्यमन्त्रान्तर्भावताय नमो नम ओं
९०. ओं स्वाहान्तमातृकामालारूपाढ्याय नमो नम ओं
९१. ओं द्वात्रिंशदक्षरमयप्रतीकाय नमो नम ओं
९२. ओं शोधनानर्हसन्मन्त्रविशेषाय नमो नम ओं
९३. ओं अष्टाङ्गयोगिनिर्वाणदायकाय नमो नम ओं
९४. ओं प्राणेन्द्रियमनोबुद्धिप्रेरकाय नमो नम ओं
९५. ओं मूलाधारवरक्षेत्रनायकाय नमो नम ओं
९६. ओं चतुर्दलमहापद्मसंविष्टाय नमो नम ओं
९७. ओं मूलत्रिकोणसशोभिपावकाय नमो नम ओं
९८. ओं सुषुम्नारन्ध्रसंचारदेशिकाय नमो नम ओं

९९. ओं षड्ग्रन्थिनिम्नतटिनीतारकाय नमो नम ओं
१००. ओं दहराकाशसशोभिशशाङ्काय नमो नम ओं
१०१. ओं हिरण्मयपुरांभोजनिलयाय नमो नम ओं
१०२. ओं भ्रूमध्यकोमलारामकोकिलाय नमो नम ओं
१०३. ओं षण्णवद्वादशान्तस्थमार्तण्डाय नमो नम ओं
१०४. ओं मनोन्मनी-सुखावासनिर्वृताय नमो नम ओं
१०५. ओं षोडशान्तमहापद्ममधुपाय नमो नम ओं
१०६. ओं सहस्रारसुधासारसेचिताय नमो नम ओं
१०७. ओं नादबिन्दुद्वयातीतस्वरूपाय नमो नम ओं
१०८. ओं उच्छिष्टगणनाथाय महेशाय नमो नम ओं

॥ श्री उच्छिष्टगणपत्यष्टोत्तरशतनामावलिः समाप्ता ॥

।। उच्छिष्टगणपतिस्तवः ।।

लम्बोदराय पललाङ्कशपानपात्र-
पाशादिहस्तकमलाय विलोहिताय ।
वामाङ्ककल्पितवधूकुचमण्डलाग्र-
तुण्डाय सन्तु महसां निधये नमांसि ।।१ ।।

षट्कोणमण्डपलसन्महनीयरत्न-
षट्त्रिंशदक्षरमहासनमध्यसंस्थम् ।
आलिङ्ग्य वामनयनां निजवामभाग-
संस्थां करेण मदविह्वलमानतोऽस्मि ।।२।।

यं वा मतङ्गमणकस्तु महीसुरोऽयं
संपूज्य चालभत तत्प्रथितं मुनित्वम् ।
स्मृत्वा जनश्च विभवानखिलानुपैति
तं भावयामि वरनीलसरस्वतीशम् ।।३।।

उच्चासनस्थमुरुण्डमुदारशोभ-
मुद्दण्डशक्तिमुदधिप्रियकान्तरूपम् ।
उत्कण्ठिवामनयनोरुकृताग्रहस्त-
मुच्छिष्टलम्बजठरं प्रणमामि नित्यम् ।।४।।

वामाङ्कवामनयनाकदलीसमोरु-
मध्ये कृताग्रकरमम्बुजबन्धुकान्तिम् ।
हस्तेषु पाशपलले चषकांकुशौ च
रम्यौ धरन्तममलं गणनाथमीडे ॥५॥

संचिन्त्य मन्त्रममलं क्षणमेव यस्य
प्राप्नोति सर्वविभवानपि रिक्तरिक्तः ।
मूका भवन्ति कवयः क्षितिनाथमान्याः
तं वा कथं त्यजति मे नतिरेकदन्तम् ॥६॥

लम्बोदराय ललनास्मरगेहलग्न-
हस्ताय लोहितरुचेऽलघुविक्रमाय ।
लक्ष्याय योगनयनेन लयापहाय
लावण्यसिन्धुपतये नतिरस्तु नित्यम् ॥७॥

दम्भोलिपाणिपरिसेवितपादपद्मं
कुम्भोन्नतस्तनभराकलिताग्रहस्तम् ।
अम्भोनिधेरपि गभीरहृदन्तरं तं
शंभोः सुतं हृदि सदैव विभावयामि ॥८॥

ईहाविहीनमुनिमण्डलमानसस्थं
स्वाहापतिप्रतिमदीप्तिमदङ्गयुक्तम्।
नीहारशैलतनयाहृदयोदितं त-
मूहाद्यगम्यमुररीकुरुते मनो म ॥९॥

सामादिवेदकुहरे विहरन्तमाद्यं
सोमाभिरामतरहस्तिमुखेन भान्तम् ।
वामाकुचाग्रकृतहस्तमुदारशोभं
तं मानरक्षणकरं गणनाथमीडे ॥१०॥

लाक्षारसारुणवपुर्ललनासहायो
लक्ष्मीपतिप्रतिमधैर्यपराक्रमश्च ।
लीलाभिसृष्टभुवनत्रितयोग्रशक्ति-
र्लम्बोदरोऽस्तु सततं मम भावनायाम् ॥११॥

वृन्दारवाञ्छितसमर्पणपारिजाते
वृन्दारकेशसतताचितपादपद्मे ।
सन्दारितारिशिखरे गजराजवक्त्रे
किं दारुकानिभबलैरितरैस्तु देवैः ॥१२॥

संसृष्टसर्वभुवनं सनकादिवन्द्यं
सांतानिकेशरघुनन्दनपुण्यकीर्तिम् ?
सिद्धिप्रदं सकलकर्मसु सेवकानां
सारं श्रुतेः सततमेकरदं श्रितोऽस्मि ॥१३॥

देवेतरार्चनकृतोद्यतिरर्चतीश
तद्विघ्नवारणकृते प्रथमं भवन्तम् ।
त्वं चेद्गणेश निखिलेप्सितदानदक्षः
किं वा पुनस्त्वितरदैवतपूजनेन ॥१४॥

॥ श्रीसुन्दरविनायकसुप्रभातम् ॥*

रत्नप्रदीपविशदीकृतसौधमध्ये
मुक्ताश्मगर्भमणिरञ्जितहेममञ्चे ।
सुप्तः सुखं सुरवधूकलितोपचारैः
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥१॥

पीताम्बरेण मृदितेन मतङ्गकन्या-
वक्षोजचन्दनमयेन भुजान्तरेण ।
गण्डेन लग्नतिलकेन च पुष्पतल्पात्
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥२॥

वीणामदङ्गपणवादिविचित्रवाद्यैः
गायन्ति नाकललनास्तव पुण्यकीर्तिम् ।
शृण्वन्निदं मधुरगीतममन्दहर्षः
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥२॥

सप्तर्षयः शरजनिर्मधुकैटभारिः
इन्द्रादिदेवनिकरः सनकादयश्च ।
काङ्क्षन्ति दर्शनमनन्यतया प्रपन्नाः
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥४॥

---

*तञ्जानगरे श्रीसुन्दरेशशर्मणा निर्मिते महालये प्रतिष्ठितस्य भगवतः श्रीउच्छिष्टगणपतेः सुन्दरविनायक इति नाम ।

वदाः सहोपनिषदां निकरेण मूर्ताः
प्रह्वाः प्रणम्य शिरसा परमेष्ठिमुख्यैः ।
भक्त्या स्तुवन्ति कृतकेतरवाग्झरैस्त्वां
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥५॥

अत्युन्नतो द्विपवरो वृषभः ककुद्मान् ।
श्वेतस्तुरङ्गमपतिः प्लवगश्च कृष्णः ।
त्वद्दर्शनाय पुरतो विनयेन तिष्ठ-
न्त्युत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥६॥

उद्दीपितान् नवधृतैरपि गन्धतैलैः
धृत्वा सुवर्णकलितान् कवयः प्रदीपान् ।
वाञ्छन्ति चारुतरमण्डनमीक्षितुं त्वां
उत्तिष्ठ सुन्दरविनायक! सुप्रभातम् ॥७॥

आहृत्य पुण्यसलिलानि नदीनदेभ्यो
रत्नाभिषेककलशैः विधिना विधिज्ञाः ।
काङ्क्षन्ति देवमभिषेचयितुं सहार्दम्
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥८॥

पीताम्बराणि विविधानि विभूषणानि
यज्ञोपवीतमनघं हरिचन्दनं च ।
आदाय भान्ति महिलास्तव मण्डनार्थम्
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥९॥

धृत्वा पयो मधु धृतं मधुरं च सक्तुं
प्रातस्तवाभ्यवहराय हिरण्यपात्रैः ।
सज्जा इमे विनयिनस्तव सूदवर्या
उत्तिष्ठ सुन्दरविनायक ! सुप्रभातम् ॥१०॥

भागीरथीजलविहारकुतूहलाय
दिक्कुञ्जराष्टकसमावृतपार्श्वकाय ।
शैलेन्द्रजाकलितपुण्यचयोदिताय
वेतण्डमत्तममुखाय च सुप्रभातम् ॥११॥

वन्दारुवृन्दहृदयाम्बुजभास्करस्य
मन्दारमूलमणिपीठसुखास्थितस्य ।
तीव्रादिसेविजनमण्डलमण्डितस्य
स्वानन्दपत्तनपतेस्तव सुप्रभातम् ॥१२॥

कैलासशैलमुनिमोहकरूपशालिन्
क्षीराब्धिमध्यगतकल्पकमूलशायिन् ।
भक्तव्रजस्य निखिलस्य च मुक्तिदायिन्
विघ्नाब्धिनायकविभो ! तव सुप्रभातम् ॥१३॥

त्रय्यन्तवागमृतसागरसारमूर्ते
वाराणसीपतिपरिष्टुतपुण्यकीर्ते ।
वाञ्छाधिकाकलितभक्तजनेष्टपूर्ते
वामोरुकल्पितकराग्रक ! सुप्रभातम् ॥१४॥

स्वानन्दपुण्यनगरे नवरत्नसौध
सिंहासने प्रियवधूं विनिवेश्य पार्श्वे ।
जावालिकाश्यपमतङ्गमुखैर्मुनीन्द्रैः
पट्टाभिषिक्त गणनायक ! सुप्रभातम् ॥१५॥

वैकुण्ठपद्मभववीजितचामरस्य
सुत्रामधारितसितातपवारणस्य ।
कुंभोदरेण धृतपादसरोरुहस्य
भद्रासनस्थनृपतेस्तव सुप्रभातम् ॥१६॥

क्षीराम्बुधौ श्रुतिगणः कमले निविष्टं
पूर्वं स काश्यपमुनिः निजपर्णकुट्याम् ।
स्वानन्दराजसदनेषु यथा मुनीन्द्राः
त्वां बोधयामि च तथा तव सुप्रभातम् ॥१७॥

श्रीसुन्दरेशकविकीर्तितसुप्रभातं
एतत्पठन्त्युषसि ये परया च भक्त्या ।
संप्राप्य सर्वमपि वांछितमत्र लोके
दीव्यन्ति वासव इवामरराजधान्याम् ॥१८॥

।। मङ्गलम् ।।

शुरुटि रागः । **संपातालः**

पल्लवि—मङ्गलम् मदमत्तवारणमुखाय ते ।
मङ्गलम् मृडगौरीमानसभवाय ते ।।

चरणम्— मन्दरविहाराय मधुवैरिसेव्याय
मन्त्रमयगात्राय मदघूर्णनेत्राय ।
मदिरारसज्ञाय मनुजकुलनाथाय
मलयाद्रिनिलयाय मदवारणमुखाय ।।१।।
मिहिराधिकाभाय मिहिकाद्रिवासाय
मुरजसमनिनदाय मृगलाञ्छनाङ्काय ।
कदनारिमहिताय महिषीसहायाय
मृगवैरिवाहाय मृडकुलाभरणाय ।।२।।
निखिलभुवनेशाय निगमान्तगेहाय
निधुवने निपुणाय निजभक्तपालाय ।
निनदजितरसिताय निकृतजनदूराय
निटिलाक्षतनयाय नीलासहायाय ।।३।।
उज्ज्वलशरीराय उरगवरभूषाय
उग्रतरवीर्याय उरुजठररम्याय ।
उपमानरहिताय उडुराजशीर्षाय
उन्मत्तवेषाय उच्छिष्टगणपाय ।।४।।
सुकुमारवेषाय सुकृतिजनसुलभाय
सुखदार्हमन्त्राय सृणिपाशहस्ताय ।
सुरभिसुममालाय सुरलोकपालाय
सुरतसुखरसिकाय सुन्दरविनायकाय ।।५।।

।। शुभं भूयात् ।।

।। मन्त्रमालास्तुतिः ।।

हस्तारविन्दकलिताङ्कुशपाशचापम्
हालाहलप्रणयिनः प्रथमं कुमारम् ।
हिंसातुरासुरकुलात्ययधूमकेतुम्
हीनास्त्वघैः सुकृतिनः सततं भजन्ते ।।१।।
तिग्मांशुमण्डलनिरन्तरमन्दिरान्तः
तीक्ष्णैः स्वकीयरुचिभिश्च विभासयन्तम् ।
तुङ्गासने मणिमये रुचिरं विभान्तम्
तूष्णीक एव हृदये कलितुं समर्थः ।।२।।
मुग्धोत्तमाङ्गकलितद्विजराजखण्डात्
मूलत्रिकोणनिलयात् मुनिमात्रगम्यात् ।
मेघस्वनप्रतिभटप्रवलाट्टहासात्
मैत्र्यार्जितामरगणात् न गतिर्ममान्या ।।३।।
खातेतरेषु तटिनीषु विहारशीलः
खद्योतभानुसदृशद्युति दुर्निरीक्ष्यः ।
ख्यातः क्षितौ प्रणतवान्धव इत्यजस्रम्
खण्डेन्दुशेखरसुतो ननु दैवतं मे ।।४।।
यज्ञोत्थितेन विधिशौरिमहेश्वराणाम्
यामार्धसंक्षुभितदैत्यकुलेश्वरेण ।
यूथाधिपेन दिविषत्पृतनागणानाम्
योषाकुचार्पितकरेण हृतं मनो मे ।।५।।

लम्बप्रकीर्णकविभूषितचूलिकस्य
लाक्षारसाभकमनीयकलेवरस्य ।
लीलातिरस्कृतपुरन्दरशात्रवस्य
लोकायतैश्च महितस्य विधेय एषः ॥६॥

बोधिद्रुमाङ्गणलसत्कलभाधिरूढे
बन्धूकपुष्पसमलोहितपट्टचेले ।
बालावराङ्गकृतमञ्जुलदीर्घशुण्डे
बीभत्सदानवरिपौ कवयो रमन्ते ॥७॥

दर्वीकराभरणजालविभूषिताङ्गात्
दाक्षायणीसहचरप्रियबालरूपात् ।
दिङ्नागवर्गपरिवारितपार्श्वभागात्
दुग्धाब्धिमध्यनिलयात्किमिहास्त्यलभ्यम् ॥८॥

राजीवबान्धवनिशाकरमन्दिरस्य
रेवानदीचिरविहारकुतूहलस्य ।
रक्तप्रसूनवसनेषु रतस्य तस्य
रोगैकभेषजमनोः करुणैव लभ्या ॥९॥

यक्षाधिपत्यद-मनोहरमन्त्रकोशः
योगाग्निमध्यतलनिर्मलजन्मदेशः ।
युद्धे पराजितशिवाविजयप्रदाता
योषिद्वराङ्गरसिको ननु मे शरण्यः ॥१०॥

उच्छिष्टसंज्ञकमरूपगुण सुसूक्ष्मम्
ऊर्जस्वलस्वमहसा कृतलोकसृष्टिम् ।
ओङ्कारमध्यगतमङ्गलबिन्दुसंस्थम्
औत्सुक्यभूमिममलं परमाश्रयेहम् ॥११॥

शिष्टष्टदाननिपुणाङ्कुशपाशपाणौ
शुभ्रांशुमण्डलनिरन्तरवासगेहे ।
शोभाकराभरणजालविभूषितेऽस्मिन्
शौर्यार्जितारिपरिवारगणे रतोऽस्मि ॥१२॥

टङ्केन ते स्मृतिमयेन निवार्य चेतः—
पाषाणतो भृशदृढौ मम कामलोभौ ।
सन्दर्शयान्तरगतां सुखमात्ररूपाम्
ज्ञानप्रभां मदगजास्य ! बुधैकदृश्याम् ॥१३॥

मन्दारमूलमणिपीठसुखास्थितेन
माध्वीकपानमदघूर्णविलोचनेन ।
मीनध्वजप्रियसखीकलितार्हणेन
मुक्तिप्रदेन गणपेन हि रक्षितोऽस्मि ॥१४॥

हार्देन जात्वविधिनापि भजन्ति ये त्वाम्
हिंस्रैस्तु काममुखषड्रिपुभिर्विहीनाः ।
हुङ्कारमात्रगतसंचितपापवृन्दाः
हेरम्ब ! मोक्षपदवीं ननु ते लभन्ते ॥१५॥

आत्मन्यपेतविषये गतरागबन्धे
इच्छागृहीततनुरीश्वर ! भासते चत् ।
उद्दण्डदण्डधरदारुणपाशबन्धात्
ओङ्कारूप ! गणनाथ ! भयं त्यजेयम् ॥१६॥

नेपथ्यकर्म कलितं सुरसुन्दरीभिः
नैसर्गिकद्युतिविवर्धकमेत्य रम्यम् ।
नूत्नाङ्गसौष्ठवयुतं महिलासहस्रैः
नौकागतं सुरधुनीषु कृती नु पश्येत् ॥१७॥

आम्नायसागरसमुद्धृतविद्रुमाभ-
मीशानपुत्रमिभवक्त्रमिरामदान्धम् ।
उत्फुल्लपङ्कजमहासनसन्निविष्ट-
मूर्जस्वलद्युतिमुशन्त्युरुभाग्यवन्तः ॥१८॥

क्रोधं विभो तव न सोढुमिहास्ति कश्चित्
क्रौञ्चारिरप्यहह निर्मद एव तेऽग्रे ।
क्रव्यादनाशक ! कथं नु तलप्रहारम्
क्लेशोत्सुकाः दिविषदां दनुजाः सहेयुः ॥१९॥

ह्रीमेदुरां भुवनसुन्दरमोहनाङ्गीम्
हृद्यप्रसाधनवतीं हृदयङ्गमां ताम् ।
हृष्टां समुज्ज्वलतनुं रचयन्निजाङ्के
हृन्मन्दिरं मम समाश्रय विश्रमाय ॥२०॥

क्लीबं वपुर्धरति यद्गुणरूपहीनम्
क्रीडार्थसृष्टभुवनं च परात्पराख्यम् ।
क्लिष्टामराधिपतिरक्षणकर्महेतोः
क्रव्यादनाशनकृते निरतं तदव्यात् ॥२१॥

ह्रौङ्कारमङ्गलमहामनुविग्रहाय
हालामदान्धमहिलाजनलोलुपाय ।
हर्यक्षवाहशकलीकृतशात्रवाय
हस्तीन्द्रसुन्दरमुखाय शतं प्रणामाः ॥२२॥

हूमित्यनन्यसुलभ मनुमेकमुक्त्वा
हव्यं तु यो दिशति वह्निमुखाय तस्मै ।
हर्म्येषु नाकतलगामिषु पौत्रसङ्घैः
हास्यैश्चचाटुवचनैश्च नयेत्स कालम् ॥२३॥

घे घे ति मन्त्रयुगलस्य सकृज्जपेन
घुष्यत्पिशाचनिकराः सभयं द्रवन्ति ।
घोरां समुत्तरति चापदमित्यभीक्ष्णम्
घण्टापथे द्विपवतां विदुषां प्रणादः ॥२४॥

उत्तुङ्गरत्नमयपीठतले स्थिताय
ऊरीकृतार्थ्यवरवाससमर्हणाय ।
ओजस्करान्तरनिरन्तरमन्दिराय
और्वाग्निवद्युतियुताय नमोऽस्तु तस्मै ॥२५॥

शिष्यप्रशिष्यकमतङ्गधृतार्हमन्त्रात्
शुश्रूषया सुरवधूकृतया प्रसन्नात् ।
शोकाग्निदग्धरतिपूजितपादपद्मात्
शौद्धोदनीडितमनोरपरेण कोऽर्थः ॥२६॥

टङ्कोद्धतत्रिदशवैरिविनाशनाय
गङ्गाधरादिसुरवृन्दकृताध्वरोत्थे ।
नीलाकराम्बुरुहधारितरत्नमाले
ब्राह्म्यादिभिः परिवृते रमते मनो मे ॥२७॥

याच्ञां विहाय विधिलब्धलवाभितृप्ताः
यागाग्निहोत्रमुखकर्मकृतः सदैव ।
यूपादिसङ्ग्रहणमात्रकृतप्रयत्नाः
योगेन लब्धधिषणा अपि तं भजन्ते ॥२८॥

स्वाराट्कुबेरमुखदेवगणाभिजप्त-
स्वाहान्तमङ्गलदपूतमनुस्वरूपः ।
स्वाध्यायमात्ररतयोगिहृदन्तरस्थः
स्वान्ते सदा वसतु मे रमणीसहायः ॥२९॥

हाहामुखादिसुरकिन्नरगीतकीर्ते
हेलाकृतापचितये च कृतप्रसाद !
हिंसारतेः सुररिपोः निधनाय क्लृप्त-
होमाग्निजात मम देहि करावलम्बम् ॥३०॥

वितरक :

देववाणी-प्रकाशनम्

आर ६, वाणी-विहार, नई दिल्ली-110059

Distributors :

DEVAVANI PRAKASHANAM

R-6, Vani Vihar, New Delhi–110059